M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.

Ser. 402

Title: Sandhya Vidhi

702 702

संध्या विधि

Samdhyā Vidhi	: Title
	: Author
	: Editor
	: Year, Vols.
	: Publisher
702	: Remarks

१०२

॥अथमानसंख्याप्रारंभः॥ छ ॥

श्रीगणेशायनमः॥ॐमः॥केशवायनमः॥ॐ
॥३॥ नारायणायनमः॥ओंमाधवायनमः॥ओंगोविं
दायनमः॥विष्णवेनमः॥मधुसूदनायनमः॥
ओंत्रिविक्रमायनमः॥ओंवामनायनमः॥ओं
श्रीधरायनमः॥ओंहृषीकेशायनमः॥ओंपद्म
नाभायनमः॥ओंदामोदरायनमः॥ओंसंकर्षणा
यनमः॥ओंवासुदेवायनमः॥ओंप्रद्युम्नायनमः॥ ॥३॥
ओंअनिरुद्धायनमः॥ओंउपेंद्रायनमः॥ओंहरयेपु
रुषोत्तमायनमः॥ओंअधोक्षजायनमः॥नारसिंहायनमः
अच्युतायनमः॥जनार्दनायनमः॥

मः॥ओंश्रीकृष्णायनमः॥प्रणवस्यपरब्रह्मऋषिः॥
परमात्मादेवता॥दैवीगायत्रीछंदः॥प्राणायामेवि
नियोगः॥ओंभूः॥ओंभुवः॥ओंस्वः॥ओंमहः॥ओं
जनः॥ओंतपः॥ओंसत्यं॥ओंभूर्भुवस्वः तत्सवितु
र्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनः प्रचोदयात्
॥ओंआपोज्योतीरसोमृतंब्रह्मभूर्भुवस्वरोम्॥ममउ
पात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसंध्या
मुपासिष्ये॥आयातुवरदादेवीअक्षरंब्रह्मसंमितं॥

गायत्रीछंदसांमाविदंब्रह्मजुषस्वमे ॥ य[illegible]कुरु

॥२॥ तेयापंतद्रात्र्यात्प्रतिमुच्यते ॥ सर्व[illegible]महादेवी

संध्याविद्येसरस्वती ॥ अजरेअमरेदेवीसर्वदेवी

नमोस्तुते ॥ ओं ओजोसीसहोसिबल[illegible]भ्राजोसि

देवानांधामनामसि ॥ विश्वमसिविश्वायुः ॥ सर्वम

सिसर्वायुः ॥ अभिभूरोम् ॥ गायत्रीमावाहयामि ॥

सावित्रीमावाहयामि ॥ सरस्वतीमावाहयामि ॥ ॥२॥

छंदऋषीमावाहयामि ॥ श्रीमावाहयामि ॥ ह्रीमा

वाहयामि ॥ आपोहिष्ठेतित्रृचस्य ओं वरिषसिंधुद्वीप

ऋषिः ॥ आपोदेवतागायत्रीछंदः ॥ मार्जनेविनियोगः ॥

ओं आपोहिष्ठामयोभुवः ॥ ओं तानऊर्जेदधातन ॥

ओं महेरणायचक्षसे ॥ ओं योवःशिवतमोरसः ॥ ओं

तस्यभाजयतेहनः ॥ ओं उशतीरिवमातरः ॥ ओं तस्मा

अरंगमामवः ॥ ओं यस्यक्षयायजिन्वथ ॥ ओं आपोज

नयथाचनः ॥ ओं सूर्यश्चमेतिमंत्रस्य ॥ याज्ञवल्क्यउप

निषद्ऋषिः ॥ सूर्यमन्युमन्युपतिर्देवता ॥ प्रकृतिछंदः

मंत्राचमनेविनियोगः ॥ ओं सूर्यश्चमामन्युश्चमन्युप

तयश्च मन्युकृतेभ्यः ॥ पापेभ्यो रक्षंतां ॥ यद्रात्र्या पापमका
॥३॥ र्षं ॥ मनसा वाचा हस्ताभ्यां ॥ पद्भ्यामुदरेण शिश्ना ॥ रात्रि
स्तदवलुंपतु ॥ यत्किंच दुरितं मयि ॥ इदमहं मामममृतयो
नौ ॥ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ आचम्य ॥ ओं आपो
हिष्ठेति नवर्चस्य सूक्तस्य ॥ अंबरिष सिंधुद्वीप ऋषिः ॥
आपो देवता गायत्री छंदः ॥ पंचमी वर्धमाना सप्तमी
प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ ॥ मार्जने विनियोगः ॥ ओं आ
पो हिष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ महेरणाय चक्ष ॥३॥
से ॥ ओं यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशती

रिव मातरः ॥ ओं तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ ॥
आपो जनयथा च नः ॥ ओं शंनो देवीरभिष्टय आपो भवंतु
पीतये ॥ शंयोरभिस्रवंतु नः ॥ ओं ईशाना वार्याणां क्षयं
तीश्चर्षणीनां ॥ अपो याचामि भेषजं ॥ ओं अप्सु मे सोमो
अब्रवीदंतर्विश्वानि भेषजा ॥ अग्निं च विश्वशंभुवं ॥ ओं
आपः पृणीत भेषजं वरूथं तन्वे मम ॥ ज्योक्च सूर्यं दृशे ॥
ओं इदमापः प्रवहत यत्किंच दुरितं मयि ॥ यद्वाहमभिदु
द्रोह यद्वा शेप उतानृतं ॥ ओं आपो अद्यान्वचारिषं रसे
न समगस्महि ॥ पयस्वानग्न आगहि तं मा संसृज वर्च

स्ता॥ ओं सत्तुष्टीस्त्वदंपसोदिवानक्तं च सत्सुधीः॥ वरेण्य
॥४॥ ऋतूरहमाद्वीरवत्सहुवे॥ भद्रंन इति मंत्रस्य॥ ऐंद्रीवाम
देव ऋषिः॥ एकपदाविराट्छंदः॥ भद्रंनोअपिवातयम
नः॥ २॥ ऋतं चेति तृचस्य॥ माधुच्छंदसो अघमर्षण
ऋषिः॥ भाववृत्तो देवता॥ अनुष्टुप्छंदः॥ अघमर्षणे
विनियोगः॥ ओं ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत॥
ततो रात्र्यजायत ततः समुद्रो अर्णवः॥ समुद्रादर्णवादधि
संवत्सरो अजायत॥ अहोरात्राणि विदधद्विश्वस्य ॥४॥
मिषतो वशी॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पय

त्॥ दिवं च पृथिवीं चांतरिक्षमथो स्वः॥ आचम्य॥ तत्सवितु
रित्यस्य गाथिनो विश्वामित्रः सविता गायत्री॥ सूर्यार्घ्य ५
दाने विनियोगः॥ ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यं भ
र्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ श्रीसूर्य
गायत्र्यै इदमर्घ्यं दत्तं न मम॥ इति त्रिः॥ ३॥ अद्ये॰ थं॰ प्रा
तःसंध्याकालातिरिक्तदोषपरिहारार्थं गायत्री चतुर्थार्
घ्यदानं करिष्ये॥ ॥ आचम्य प्राणानायम्य॥ ओं अपसर्प
तु ये भूता ये भूता भूमिसंस्थिताः॥ ये भूता विघ्नकर्तारः ते
नश्यंतु शिवाज्ञया॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो

द्विजं॥ सर्वेषामविरोधेन ब्रह्मकर्मसमारभे॥ पृथिवी
॥५॥ तिमंत्रस्य॥ मेरुपृष्ठ ऋषिः॥ कूर्मोपृष्ठो देवता॥ सुत
लं छंदः॥ आसने विनियोगः॥ पृथिव्या धृता लोका
देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवी पवित्रं कुरु
चासनं॥ अंगुष्ठाग्ने तु गोविंदं तर्जन्यां तु महीधरं॥ मध्य
मायां हृषीकेशमनामिक्यां त्रिविक्रमं॥ कनिष्ठिकां
न्यसेद्विष्णु करमध्ये तु माधवं॥ एवं चकरविन्यासं स ॥५॥
र्वपापप्रणाशनं॥ ओं भूः पादाभ्यां नमः॥ ओं भुवः जा
नुभ्यां नमः॥ स्वः कटिभ्यां नमः॥ ओं महः नाभ्यां नमः

ओं जनः हृदयाय नमः॥ तपः कंठाय नमः॥ ओं सत्यं ल
लाटाय नमः॥ ओं परब्रह्म शिरसे स्वाहा॥ ओं तत्सवि
तुर्हृदयाय नमः॥ वरेण्यं शिरसे स्वाहा॥ भर्गो देवस्य शि
खायै वौषट्॥ धीमहि कवचाय हुं॥ धियो यो नः नेत्रत्रया
यै वौषट्॥ प्रचोदयात् अस्त्राय फट्॥ गायत्र्या गाथि
नो विश्वामित्र ऋषिः॥ सविता देवता॥ गायत्री छंदः॥
श्वेतो वर्णः॥ अग्निमुखः॥ ब्रह्मा शिरः॥ विष्णुर्हृदयं॥
रुद्रो ललाटं॥ पृथ्वी कुक्षिः॥ त्रैलोक्यं चरणौ॥ अशेष
पापक्षयार्थे॥ सांख्यायनसगोत्रा त्रिनेत्रा त्रिपदा गाय

श्रीदशसंख्या गायत्रीजपमहं करिष्ये ॥ आगच्छ वरदे दे
॥ ८ ॥ वी जपे मे संनिधौ भव ॥ गायंतं त्रायसे यस्मात् गायत्री त्वं
ततः स्मृता ॥ सुमुखं संपुटं चैव विततं विस्तृतं तथा ॥ द्वि
मुखं त्रिमुखं चैव चतुःपंचमुखं तथा ॥ षण्मुखाऽ
धोमुखं चैव व्यापकांजलिकं तथा ॥ शकटं यमपा
शं च ग्रथितं चोन्मुखोन्मुखं ॥ प्रलंबं मुष्टिकं चैव म
त्स्यः कूर्मो वराहकं ॥ सिंहाक्रांतं महाक्रांतं मुद्गरं पल्ल
वं तथा ॥ एता मुद्राश्चतुर्विंशा गायत्र्यां सुप्रतिष्ठिताः ॥ ॥ ८ ॥
गायत्रीं जप्त्वा ॥ ॐ ॥ तत्सवितुर्हृदयाय नमः ॥ वरेण्यं शिर

से स्वाहा ॥ भर्गो देवस्य शिखायै वौषट् ॥ धीमहि कवचाय
हुं ॥ धियो यो नः नेत्रत्रयाय वौषट् ॥ प्रचोदयात् अस्त्राय फ
ट् ॥ सुरभिर्ज्ञानशूर्पं च योनिः कूर्मोऽथ पंकजं ॥ लिंगं नि
र्याणमुद्रा च जपांते षट् प्रदर्शयेत् ॥ ॐ जातवेदसे मा
रीचः कश्यपो दुर्गा त्रिष्टुप् ॥ सूर्योपस्थाने विनियोगः ॥ ॐ जा
तवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ॥ स नः
पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ मित्रस्ये
ति च तस्य गाथिनो विश्वामित्रः सूर्यो गायत्री ॥ सूर्योप
स्थाने विनियोगः ॥ मित्रस्य चर्षणीधृतो वो देवस्य सानसिः ॥

द्युम्नं। चित्रश्रवस्तमं॥ अभिर्यो महिना दिवं मित्रो बभूव
७॥ सप्रथाः॥ अभि श्रवोभिः पृथिवीं॥ मित्राय पंच येमि
रे जनो अभिष्टिशवसे॥ स देवान्विश्वान्बिभर्त्ति॥ मि
त्रो देवेष्वायुषु जनाय वृक्तबर्हिषे॥ इष इष्टव्रता अ
कः॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥ सूर्योपस्थाने वि
नियोगः॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ ॥
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ तच्छंयो ७॥
शंयुर्विश्वेदेवाः शक्करी॥ सूर्योपस्थाने विनियोगः॥ त

॥७

[illegible] गातुं यज्ञाय गातुं यज्ञपतये॥ दैवीस्वस्तिरस्तु
नः॥ स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगातु भेषजं॥ शं नो अस्तु
द्विपदे शं चतुष्पदे॥ नमो ब्रह्मणे प्रजापतिर्विश्वेदेवा जग
ती॥ सूर्योपस्थाने विनियोगः॥ ॐ नमो ब्रह्मणे नमो अ
स्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः॥ नमो वाचे नमो वा
चस्पतये नमो विष्णवे महते करोमि॥ यां सदा सर्वभूता
नि स्थावराणि चराणि च॥ सायं प्रातर्नमस्यंति सा
मा संध्याभिरक्षतु॥ सा मा संध्याभिरक्षतों नमः॥ प्रा
च्ये दिशे इंद्राय नमः॥ आग्नेय्यै दिशे अग्नये नमः॥ दक्षिणा

॥ ९ ॥ यै दिशे यमाय नमः ॥ नृत्यै दिशे नृत्येन नमः ॥ प्रतीच्यै दिशे व
रुणाय नमः ॥ वायव्यै दिशे वायव्ये नमः ॥ उदीच्यै दिशे सो
माय नमः ॥ ईशान्यै दिशे ईश्वराय नमः ॥ ऊर्ध्वायै दिशे ब्र
ह्मणे नमः ॥ अधरायै दिशे अनंताय नमः ॥ संध्याय नमः ॥ वि
द्याय नमः ॥ गायत्र्यै नमः ॥ सावित्र्यै नमः ॥ सरस्वत्यै नमः ॥
सर्वाभ्यो देवताभ्यो नमो नमः ॥ उत्तमे शिखरे जाते भूम्यां प
र्वतमूर्धनि ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथासुखं ॥ स्तु
तो मया वरदा वेदमाता ॥ प्रचोदयंती पवने द्विजाता ॥ आयुः पृ ॥ ९ ॥
रायु [illegible] ब्रह्मवर्चसं ॥ मह्यं दत्वा व्रजातं ॥ ब्रह्मलोकं
…तमनुत्ता ॥ सर्वे काम अभिवादयेत ॥ ४

आकाशात्पतितं तोयं यथा गच्छति सागरं ॥ सर्वदेवनमस्का
रः केशवं प्रति गच्छति ॥ श्रीकेशवं प्रति गच्छतो नमः ॥ पु
रुस्यो नमः ॥ वेदपुरुषाय नमः ॥ सदाशिवाय नमः ॥ श्री
लक्ष्मीनारायणाय नमः ॥ वैश्वामित्राघमर्षणकौशि प
केति त्रय प्रवरान्वित कौशिकगोत्रोत्पन्नोहं ऋग्वेदस्य
आश्वलायनशाखा कलशाकाध्यायिनं ॥ अमुकशर्माहं
भो गुरो अभिवादयामि ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मण
हिताय च ॥ जगधीताय कृष्णाय गोविंदाय नमो नमः ॥ कृष्ण
श्रीगोविंदाय नमो नमः ॥ आचम्य प्राणानायम्य ॥ ॥

प्रातःसंध्याख्येन कर्मणा भगवान् परमेश्वरः प्रीयतां न
॥९॥ मम ॥ अथ सायंसंध्याप्रारंभः ॥ आचम्य प्राणानाय
म्य ॥ मम उपा० सायंसंध्यामुपासिष्ये ॥ आयातु० मे ॥
यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते ॥ अत्र यथा
चनः ॥ अग्निश्च मेति मंत्रस्य ॥ ऋषिः अग्निमन्युमन्यु
पतिर्देवता ॥ ० प्रदह्यातापमकार्षं० रु० अ० अहस्त
दवलुंपतु० सत्ये ज्योतिषि जु० आचम्य ॥ आपो नव० ॥१॥
ऋतं चेति० स्वः ॥ आचम्य ॥ तत्सवि० वरुण अर्घ्यदाने०
नम० श्रीवरुणाय स्वस्तीदमर्घ्यं दत्तं न मम ॥ इति त्रिः ॥

आचम्य प्राणानायम्य ॥ अपसर्पं० ॥ जानवे० वरुणउपस्था
ने विनियोग० जा० ॥ इमंमे वरुण तत्वायामि शुनःशेप ऋ
षि वरुणस्त्रिष्टुप् ॥ वरुणउपस्थाने विनियोगः ॥ इमंमे वरु
ण श्रुधी हवमद्या च मृळय त्वामवस्युराचके ॥ तत्वा
ने यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥
पासदा० अमुकशर्माहं ॥ आचम्य ॥ सायंसंध्याख्येन कर्म
णा भगवान् परमेश्वरः प्रीयतां ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

१०

॥ इतिसायंसंध्यासमाप्तः॥शुभंभवतु॥

॥ श्री॥